# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(New)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.C.2.3.6** | समयः- 8 तः 11 पर्यन्तम् |

दिनाङ्कः –15/10/2019 सन्दर्भग्रन्थः – स्वप्नवासवदत्तम्

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ निम्नलिखितेषु द्वयोः व्याख्या कार्या।** १०

१ भासनाटकचक्रस्य निरूपणम्।

२ नाटकस्य लक्षणं विलिख्य नाटके तस्य सङ्गतिः दर्शनीया।

३ स्वप्नवासवदत्तस्य रसवैशिष्ट्यं निरूपयत ।

**प्रश्न २ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ भासस्य परिचयं विलिख्य स्वप्नवासवदत्तस्य शीर्षकार्थं निरूपयत।

२ वासवदत्तायाः पात्रपरिचयं लिखतु।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नेषु द्वयोः व्याख्या कार्या।** १०

१ भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः॥

२ तीर्थोदकानि समिधः कुसुमानि दर्भान् स्वैरं वनादुपनयन्तु तपोधनानि।
धर्मप्रिया नृपसुता न हि धर्मपीडामिच्छेत् तपस्विषु कुलव्रतमेतदस्याः॥

३ नैवेदानीं तादृशाश्चक्रवाकाः नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तृस्नेहात् सा हि दग्धाऽप्यदग्धा॥

**प्रश्न ४ अधः प्रदत्तयोः प्रश्नयोः कश्चिदेकः प्रश्नः विवर्ण्यः ।** १०

१ स्वप्नवासवदत्तस्य प्रथमाङ्कस्य सारं निरूपयतु ।

२ स्वप्नवासवदत्तस्य नान्दीश्लोकस्य विवरणं विधीयताम् ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नलिखितासु द्वयोः व्याख्या कार्या ।** १०

१ **वासवदत्ता –** हला अतिचिरं कन्दुकेन क्रीडित्वाऽधिसंजातरागौ परकीयौ ते हस्तौ संवृतौ

**चेटी –** क्रीडतु क्रीडतु तावद् भर्तृदारिका । निवर्त्यतां तावदयं कन्याभावरमणीयः ।

२ वासवदत्ता – इयं गुम्फामि । आनय तावत् ।

चेटी – गृह्णात्वार्या ।

वासवदत्ता – (वर्जयित्वा विलोक्य) इदं तावदौषधं किं नाम।

चेटी – 'अविधवाकरणं' नाम ।

वासवदत्ता – (आत्मगतम्) इदं बहुशो गुम्फितव्यं मम च पद्मावत्याश्च ।

३ वासवदत्ता – गतैषा । अहो अत्याहितम् ।

आर्यपुत्रोऽपि नाम परकीयः संवृत्त: । अविधा, शय्यायां मम दुःखं विनोदयामि, यदि निद्रां लभे । (निष्क्रान्ता)

**प्रश्न ६ अधः प्रदत्तयोः कश्चिदेकं प्रश्नं विशदयत ।** १०

१ द्वितीयाङ्कस्य कथासारं निरूपयतु ।

२ तृतीयाङ्कस्य कथासारं निरूपयतु ।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानां लघूत्तराणि लिखत ।** १०

१ स्वप्नवासवदत्तस्य रचयिता कः ?

२ स्वप्नवासवदत्ते कति अङ्काः सन्ति ?

३ स्वप्नवासवदत्तस्य आरम्भः केन शब्देन भवति ?

४ उदयनस्य मन्त्री कः अस्ति ?

५ अवन्तिका इति कस्या नाम अस्ति ?

६ उत्सारणां कौ कुरुतः ?

७ उत्सारणां कर्तुं कः निषेधति ?

८ भासनाटकचक्रे कति नाटकानि सन्ति ?

९ कस्य रक्षणं दुःखम् ?

१० प्रथमाङ्के कति श्लोकाः सन्ति ?

११ महासेन इति कस्य नामाऽस्ति ?

१२ वत्सराजः कः अस्ति ?

१३ कौतुकमालिकां का गुम्फति ?

१४ शरचापहीनः कामदेवः इति चेटी कस्य विषये वदति ?

१५ वासवदत्ता किमौषधं मालायां न गुम्फति ?